International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(2): 19-24
© 2017 IJSR
www.anantaajournal.com
Received: 11-01-2017
Accepted: 12-02-2017

**N. Ramu**
Research Scholar, Department of Sanskrit, Osmania university, Hyderabad, Telangana, India

**Correspondence**
**N. Ramu**
Research Scholar, Department of Sanskrit, Osmania university, Hyderabad, Telangana, India

# कामन्दकीययुद्धव्यूहरचनाविधानम्

**N. Ramu**

**प्रस्तावना**

सृष्ट्यादेः अद्यावधि धीराः विभिन्नयुध्दविधानान्यनुसृत्य देशसंरक्षणाय निरन्तरं प्रयतन्ते । युध्दानां प्रधानं कारणं सर्वत्र सर्वथा भूमिरेव भवति इति महाभारतवचनात् ज्ञायते तदित्थं एवं अस्ति-

भूमौ  च जायते सर्वं भूमौ सर्वं विनश्यति
भूमिः प्रतिष्ठा भूतानां भूमिरेव परायणम् ।
यस्य भूमिस्तस्य सर्वं जगत् स्थावरजङ्गमानां
तत्रातिगृद्ध्रा राजानो विनिघ्नन्तीतरेतरम् ।।

**महाभारतं भीष्म 4-20-21**

युध्दानि प्रजासंरक्षणार्थं स्वराष्ट्रस्य च संरक्षणार्थं कारयेन्नृपः इति वृध्दहारीतः। (7.224 वृद्धहारीतः) परेणाभियुक्तञ्च सर्वात्मना स्वं राष्ट्रं गोपायेत्। (विष्णुस्मृतिः3.43) राज्ञा शत्रुषु दण्डयात्रां कदा कार्यं कथं कार्यं इत्ययं विषयः कामन्दकः नीतिसारग्रन्थे पञ्चदश सुसर्गेषु स्वाम्यामात्यादिसप्ताङ्गानि तेषां प्रयोजनानि एवं व्यसनानि निरूप्य शत्रवः यदा व्यसनैः पीड्यन्ते तदा दण्डयात्रां कुर्यादिति उपदिशति। एवं राज्ञा आदौ सामदानभेदादि त्रिविधोपायाः यदा विफलाः भवन्ति तदा दण्डयात्रां आरभेत् विजिगुषाणा प्रभुणा। मूलं भृतं श्रेणि सुहृद्विषदाटविकषड्विधबलौःहयगजरथपदातिदलैःमन्त्रव्यूहरचनया राजा युध्दमारभेत्।
अत्र विविधव्यूहानां रचनाविधानं राज्ञः अत्यन्तावश्यकं। तेषं व्यूहानां स्वूरूपं रचनाविधानं इत्यादिविषयाः नीतिसारे सुस्पष्टं विशदीकृताः तदित्थं वर्तते।

व्यूहः

व्यूहस्य उरस्यं कक्षौ पक्षौ इमे त्रयः प्रधानाङ्गाः । उरः कक्षौ पक्षौ मध्यं पृष्टः प्रतिग्रहः कोटी इति व्यूहस्याङ्गाः सप्त प्रोक्ताः शास्त्रज्ञैः।उरः कक्षौ च पक्षौ च मध्यं पृष्टं प्रतिग्रहः। कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह इष्यते ।। कामन्दकनीतिसारः 20-35
अत्र बुहस्पतिशुक्रयोः मतभेदः वर्तते । **पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः। पक्षौ कक्षावुरस्यं प्रतिग्रहः इति बार्हस्पत्यः।। पक्षावुरस्यं प्रतिग्रह इत्यौशनसो व्यूहविभागः। पक्षौ कक्षावुरस्यं प्रतिग्रहः इति बार्हस्पत्यः।** (कौ. अ. 10.6) पक्षौ –बहिपुरस्तात्कोट्यौ, उरस्यं - मध्यम्, प्रतिग्रहः सैन्यपृष्टदेशः, उशनसोक्तः व्यूहविभागः। पक्षौ बहिपुरस्तात्कोट्यौ कक्षौ- पश्चादन्तःपार्श्वे, उरस्यं मध्यम्, प्रतिग्रहः सैन्यपृष्टम् इति षडवयवः इति।

**एतषु सप्तभेदेषु रथ हय गज पदातीनां नियोजनक्रमभेदेन विभिन्ना व्यूहाः परिकल्प्यन्ते। ते च व्यूहाः दण्डव्यूहव्यहनम्, भोगव्यूहव्यूहनम्, मण्डलव्यूहव्यूहनम्, असंहतव्यूहनम् इति प्रधानतया प्रकृतिव्यूहाः चतुर्विधाः भवन्ति तदुक्तं कामन्दकीये**

**मण्डलोऽसंहतो भोगो दण्डश्चेति मनीषिभिः।**
**कथिताः प्रकृतिव्हूहा भेदास्तेषां प्रकीर्तितातः।।**

**कामन्दकनीतिसारः** 20.41

**भोगव्यूहः** - 1.**गोमूत्रिका** 2. **अहिसञ्चारी** 3.**शकटव्यूहः** 4.**मकरव्यूहः** 5.**परितन्तिकः**

**दण्डव्यूहः -** 1. **प्रदरः** 2, **दृढकः** 3. **असहयः** 4. **चापः** 5. **चापकुक्षिः** 6. **प्रतिष्ठः** 7. **सुप्रतिष्ठः** 8. **श्येनः** 9. **विजयः** 10. **सञ्जयः** 11. **विशालविजयः** 12. **सूची** 13. **स्थूणकर्णः** 14. **चमूमुखः** 15. **झषास्यः** 16. **वलयः** 17. **दुर्जयः**

**मण्डलव्यूहः –** 1. **सर्वतोभद्रव्यूहः** 2. **दुर्जयव्यूहः**

**असंहतव्यूहः –** 1. **अर्धचन्द्रः** 2. **उद्धार** 3. **वज्रः** 4. **कर्कटशृङ्गी**, 5. **काकपादि** 6. **गोधिका**

**शार्ङ्गधरसंहितायां सामान्यतः व्यूहविधिः एवं उक्तः-**

**मुखे रथः गजाः पृष्टे तत्पृष्टे च पदातयः। पार्श्वयोश्च हयाः कार्या व्यूहस्यायं विधिः स्मृतः।।**

$ **चिह्नं –रथः**

+-**चिह्नं –गजः**

*-**चिह्नं- पदाति**

&-**अश्वः**

******
+++++
&&&&& $$$$ &&&&&

**उ – उरस्यम्, क- कक्षः, प- पक्षः प्र- प्रतिग्रहः**

**विष्णुधर्मोत्तरपुराणोक्तरीत्या व्यूहाः द्विविधाः प्रोक्ताः प्राण्यङ्गरूपम् द्रव्यरूपम् इति । गजतुरगपदातिभिः निर्मितव्यूहः प्राण्यङ्गव्यूहः, रथादिद्रव्यैः रचित व्यूहः द्रव्यरूपव्यूहः इति। एषु द्विप्रकारकव्यूहेषु प्रधानाः गारुडः मकरः चक्रः श्येन अर्धचन्द्रः चन्द्रः शकट सर्वतोभद्र सूची इत्यादयः।**

**कुञ्जरं वा रथं चाश्वामारुहेदभिमन्त्रितम् ।**
**आरुहय शिबिराद्राजा निश्क्रम्य समये शुभे ।।**

**वि ध** 2-177, 15

**देशे त्वदृश्यः शत्रूणां कुर्यात् प्रकृतिकल्पनाम् ।**
**संहतान् योधयेदल्पान् कार्मं विस्तारयेद्वहत् ।।**

**वि ध** 2-177, 16

**सूचीमुखमानीकं स्यादल्पानां बहुभिः सह ।**
**व्यूहाः प्राण्यङ्गरूपाश्च द्रव्यरूपाश्च कल्पिताः।।**

**वि ध** 2-177, 17

**गारुडो मकरव्यूहश्चक्रं श्येनस्ततथैव च ।**
**अर्धचन्द्रश्च चन्द्रश्च शकटव्यूह एव च ।।**

**वि.ध** 2-177, 18

**व्यूहश्च सर्वतोभद्रः सूचीव्यूहस्तथैव च ।**
**पद्मश्च मण्डलव्यूहः प्राधान्येन प्रकीर्तिताः।।**

**वि.ध** 2-177, 19

**भेगव्यूहभेदाः एवं प्रोक्ताः।**

**गोमूत्रिकाऽहिसञ्चारो शकटो मकरस्तथा ।**
**भोगभेदाः समाख्यातास्तथा परितन्तकः।**
**गोमूत्रिका गवां मूत्ररेखाकारो विभाव्यते ।**
**अहेश्चसरणस्थानं चाहिसार्यभिधीयते ।**
**दण्डपक्षो युगोरस्यः शकटस्तद्विपर्ययः।।**
**मकरो व्यवकीर्णश्च शेषः कुञ्जरराजिभिः।।**

**का नी** 20-48, 49

**भोगप्रकृतिव्यूहः**

प क उ क प

प्र

1. गोमूत्रिका

प
क
उ
क
प
प्र

**2. अहिसारी**

क क

प उ प

प्र

**3. शकटः**

क उ उ क

प प

प्र

**4. मकरः**

प प

क उ उ क

**5. परितन्तिकः**

प प

क उ उ क

प्र

**दण्डप्रकृतिभेदाःसप्तदश भवन्ति, तेषां स्वरूपं एवं निरूपितम् ।**
**दण्डःप्रकृतिव्यूहः**

प क उ क प

प्र

**1. प्रदरः**

क क

प उ प

प्र

**2. दृढकः**

उ

प क क प

प्र

**3. असह्यव्यूहः**

प प

क उ क

प्र

**4. चापः**

प उ प

क क

प्र

**5. चापकुक्षिः**

प क क प

उ

प्र

**6. प्रतिष्ठः**

क उ क

प प

प्र

**7. सुप्रतिष्ठः**

प प

क क

उ

प्र

८. श्येनः

उ

क क

प प

प्र

**9. विजयः**

क उ क क उ क

क उ क

प्र

**10. सञ्जयः**

प उ प क उ क प उ प

क क क क

**11. विशालविजयः**

प प क उ क प प

प प क उ क प प

**12. सूची**

प

क

उ

क

प

प्र

**13. स्थूणाकर्णः**

प प क उ क प प

प्र

**14. चमूमुखः**

प प

प प

प प

प क उ क प

प्र

**15. झषास्यः**

प क उ क प

प प

प प

**प** **प**

**16. वलयः**

प क उ क प

प क उ क प

**17. दुर्जयः**

**मण्डलप्रकृतिव्यूहाः**

**मण्डलव्यूहभेदौ च सर्वतोभद्रदुर्जयौ ।**
**गजानीको द्वितीयस्तु प्रथमः सर्वतोमुखः।।**

**का.नी. 20,50**

उ

क क

प प

प्र

**1. सर्वतोभद्रव्यूहः**

उ

क क

प प

प्र

**2. दुर्जयः**

उ उ

क क

क क

प प

प्र

**अर्धचन्द्र उद्धारो वज्रो भेदास्त्वसंहतेः।**
**तथा कुक्कुट शृङ्गी च काकपादी च गोधिका ।।**
**त्रिचतुः पञ्चसैन्यानां ज्ञेया आकारभेदतः।**
**इति व्यूहाः समाख्याता व्यूहभेद प्रयोक्तृभिः।।**

**का नी** 20, 51, 52

**असंहतप्रकृतिव्यूहः**

प क उ क प

प्र

**1. अर्धचन्द्रः**

प प

क उ क

प्र

**अस्य अर्धचन्द्रव्यूहरचनं अर्जुनेनकृतम् तदित्थं वर्णितं महाभारते -**

**व्यूढं दृष्ट्वा तु तत्सैन्यं सव्यसाची परंतपः।**
**धृष्टद्युम्नेन सहितः प्रत्यव्यूहत संयुगे ।**
**अर्धचन्द्रेण व्यूहेन व्यूहं तमतिदारुणम्**
**दक्षिणं शृङ्गामास्थाय भीमसेनो व्यरोचत ।**
**नानाशस्त्रौढसम्पन्नैर्नानदेश्यैर्नृपैर्वृतः।**

**महाभारतं भीष्म** 52-10-18

**2. कर्कटशृङ्गी**

क क

प प उ प प

प्र

**3. काकपादी**

क क

उ

प प

**एवं प्रकारेण व्यूहाः भोगव्यूहाः पञ्च, दण्डव्यूहाः सप्तदश, मण्डलव्यूहः द्विविधः,असंहव्यूहास्तु षड् व्यूहाः सप्रमाणं निरूप्य तदनन्तरं, श्येन सूचीमुखः, वज्रः, शकटः, मकरः, एवं अम्बुज इत्यादिव्यूहाः अपि सन्ति तेषां आकारान् प्रकल्पयेत् इत्युक्तं व्यूहरचनविधानं कामन्दकः नीतिसारे**

**श्येनः सूची मुखोवज्रः शकटो मकरोऽम्बुजः।**
**इत्यादयः स्मृताः व्यूहास्तादाकारान् प्रकारयेत् ।।**

**का नी** 20-54

**एतेषां लक्षणस्वरूपादिविवरणं राजनीतितदितरग्रन्थेषु न उल्लिखितं परं रामायणे एवं महाभारते च गरुडव्यूहवर्णनम् दृश्यते तदित्थं वर्तते ।**

**रामकृत गरुडव्यूहः**

**एवं वृक्षशिलाभिश्च पूरयित्वा महार्णवत् ।**
**द्वारमावृत्य लङ्काया रामस्तिष्ठति सायुधः।।**
**गारुडं व्यूहमास्थाय वानरैर्बहुभिर्वृतः।**
**मां विसृज्य महातेजा लङ्गामेवोपवर्तते ।।**

**वाल्मीकिरामायणम् युध्दकाण्डः** 6.6.10

भीष्मकृतः गारुडव्यूहः

**गरूडं च महाव्यूहं चक्रे शान्तनवस्तदा।**
**पुत्राणां ते जयाकाङ्क्षी भीष्मः कुरुपितामहः।।**
**गरुडस्य स्वयं तुण्डे पिता देवव्रतस्तव ।**
**चक्षुषी च भरद्वाजः कृतवर्मा च सात्वतः।।**
**अश्वत्थामा कृपश्चैव शीर्षमास्तां यशस्विनौ ।**
**त्रिगर्तैर्मत्स्यकैकेयैर्वाटधानैश्च संयुतौ ।।**
**भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष।**
**मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च ये ।।**
**जयद्रथेन सहिता ग्रीवायं संनिवेशिताः।**
**पृष्टे दुर्योधनो राजा सोदरैः सानुगैर्वृतः।।**
**विन्दानुविन्दानुवावन्त्यौ काम्बोजश्च शकैः सह ।**
**पुच्छमासान् महाराज शूरसेनाश्च सर्वशः।**
**मागधाश्च कलिङ्गाश्च दाशेरकगणैः सह ।।**
**दक्षिणं पक्षमासाद्य स्थिता व्यूहस्य दंशिताः।**
**काननाश्च विकुञ्जाश्च मुक्ताः पुण्ड्राविषस्तथा ।**

**महाभारतं भीष्मपर्वम्** 52.3-9

**एवं भारते भीष्मपर्वणिसप्तदशाध्याये धर्मराजविरचितः इन्द्रस्य वज्राख्यो वज्रव्यूहवर्णनम् एवम् अस्ति ।**

**धृतराष्ट्र उवाच** **अक्षौहिण्यो दशैकां च व्यूढां दृष्ट्वा युधिष्ठिरः।**
**कथमल्पेन सैन्येन प्रत्यव्यूहत पाण्डवः।।**
**सञ्जय उवाच** **धार्तराष्ट्राण्यनीकानि दृष्ट्वा व्यूढानि पाण्डवः।**
**अभ्यभाषत धर्मात्मा धर्मराजो धनञ्जयम् ।**
**महर्षेर्वचनात्तात वेदयन्ति बृहस्पतेः।**
**संहतान् योधयेदल्पान् कामं विस्तारयेत् बहून् ।।**

**महाभारतम्** 6-19-1-5

**उपसंहारः**

**प्राचीनकालादारभ्य अद्यावधि राज्यरक्षणाय प्रजारक्षणाय च युध्दाःआवश्यकाः भवन्ति । प्राचीनराजनीतिज्ञाः सर्वेऽपि युध्दविधानं व्यूहानामावश्यकता इत्याद्यंशान् सम्यक् निरूपितवन्तः। तेषां क्रमे कामन्दकः राजनीतिनिपुणः नीतिसारं व्यूहरचनाविधानं सम्यक् प्रतिपादितम् ।तद्विज्ञानं तच्चचातुरी आधुनिककाले साक्षात् यद्यपि नोपयोगकारी भवति तथापि**

**अन्यमार्गे अस्य विज्ञानं उपयोगकरं भवतीति वक्तुं शक्यते ।**

**उपयुक्तग्रन्थसूची**


1. **विष्णुधर्मोत्तरपुराणम्** – **आर्षविज्ञावट्रस्ट्**
2. **धर्मकोशः**-
3. **वीरमित्रोदयः**- (**राजनीतिप्रकाशः**) **चौखम्बासंस्कृतसीरिज् आपीस् वारणासी**
4. **महाभारतम्**- **गीताप्रेस्**
5. **कामन्दकनीतिसारः**- **कामन्दकः**